Sl.No. :

नामांक Roll No.

No. of Questions – 23

No. of Printed Pages – 3

VU–53–Nim. Dar.

यहाँ से काटिए

वरिष्ठ उपाध्याय परीक्षा, 2018

निम्बार्क दर्शनम्

समय : 3¼ घण्टे

पूर्णांक : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

परीक्षार्थिभ्य: सामान्यनिर्देशा:

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क: अनिवार्यत: लेख्य: ।

2) सर्वे प्रश्ना: अनिवार्या: ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागा: एकत्र एव लेखनीया।

5) सर्वे प्रश्ना: संस्कृतमाध्यमेन उत्तरणीया: ।

यहाँ से काटिए

1) विशिष्टाद्वैत सिद्धान्तस्य प्रवर्तक: क: ? [1]

2) कमलेक्षणं कस्य लक्षणम् ? [1]

3) निम्बार्कपरम्पराया कयो: उपासना वर्तते ? [1]

4) द्वैताद्वैत विवेकस्य रचयिता क: आसीत् ? [1]

5) निम्बार्कमते पदार्थ: कतिविध: ? नामान्यपि लिखत। [1 + 1 = 2]

6) अद्वैतं किम् ? [2]

7) भेदवादस्य समर्थनाय त्रीणि श्रुति वाक्यानि लिखत। [2]

8) अभेद वादस्य समर्थनाय त्रीणि श्रुति वाक्यानि लिखत। [2]

9) गति शब्दस्य व्युत्पत्तिं अर्थं च लिखत। [1 + 1 = 2]

10) कोशा: कति विधा: ? नामानि लिखत। [1 + 1 = 2]

11) अचेतन तत्त्वस्य कति भेदा: ? नामानि लिखत। [1 + 1 = 2]

12) नान्यागति: कृष्णपदारविन्दात् इत्यस्य भावार्थं स्पष्टयत। [2]

13) चेतनतत्त्वस्य कति विशेषणानि ? नामानि लिखत। [1 + 1 = 2]

14) दैन्यादि पदेन केषां गुणानां ग्रहणं भवति ? [4]

15) निम्बार्क परम्पराया उपासना स्वरुपं निर्दिशत ? [4]

16) प्रपञ्चं प्रति ब्रह्म कीदृशं कारणं ? इति यथाधीतं लिखत। [4]

17) निम्नलिखितयो: पद्ययोर्यथेच्छमेकस्य व्याख्या क्रियताम् [4]

किंच किंचिदिह विद्यते नहि त्वां विनाण्वपि तथाऽखिलेश्वर।
नेति नेति च निषेधिताश्रयस्तद्विशेषविषयोऽपि सम्मत:।।

अथवा

जयति च मद्गुरुचरणं यत्संसर्गाद बोधोऽपि।
काञ्चनभूतिं लभते पारससङ्गाद्यथा लौह:।।

18) वेदान्त दशश्लोकी ग्रन्थानुसारं चित् तत्त्वस्य स्वरुपं लक्षणं च प्रतिपादयत। [7]

अथवा

निम्बार्कमतानुसारं उपासनाया: स्वरुपं प्रयोजनं च लिखत।

19) निम्नांकितयो: श्लोकयो: एकस्य सप्रसङ्ग व्याख्या विधेया – [1 + 6 = 7]

सर्वं हि विज्ञानमतो यथार्थकं श्रुतिस्मृतिभ्यो निखिलस्य वस्तुन:।
ब्रह्मात्मकत्वादितिवेदविन्मतं त्रिरुपतापि श्रुतिसूत्र साधिता।।

अथवा

उपास्यरुपं तदुपासकस्य च कृपाफलं भक्तिरसस्तत: परम्।
विरोधिनो रुपमथैतदाप्तेर्ज्ञेया इमेऽर्था अपि पञ्च साधुभि:।।

20) स्वतन्त्र सत्ता ''पर ब्रह्म निष्ठा'' इत्यर्थ: श्रुतिस्मृतिप्रमाणै: कथं साधितभिति लिखत। [7]

अथवा

भक्ति कतिधा भवति ? इति विवेचनीयम्।

21) द्वैताद्वैतविवेक रीत्या ब्रह्मण: सविशेत्वं निर्विशेत्वं च साधनीयम्। [7]

अथवा

द्वैताद्वैतपदे समानाधिकरण्य विरोध: केन प्रकारेण जायते ? लिखत।

22) द्वैताद्वैतविवेकोक्तरीत्याऽप्राकृततत्वं विवेचयत। [7]

अथवा

भेदाभेद सिद्धान्ते भेद: भावरुपतया वा अभावरुपतया सम्मत: ? ग्रन्थोक्त दिशा साधनीय:।

23) द्वैताद्वैतविवेक ग्रन्थानुसारं राधाकृष्णयोर्भदाभेद रुपं साधयत। [7]

अथवा

जयति जयति राधाकृष्णयुग्मं वरिष्ठं व्रतसुकृतनिदानं यत्सदैतिह्यमूलम्।
विरलसुजनगम्यं सच्चिदानन्दरुपं व्रजवलयविहारं नित्य वृन्दावनस्थम्।। पद्यमिदं यथाधीतं व्याख्यायताम्।

DO NOT WRITE ANYTHING HERE